पुण्डरीकमयो भद्रासनं राजासनं तु यत् ॥”

इति जटाधरः ॥

अपि च शब्दरत्नावल्याम् ।
“छत्रे कनकदण्डे तु रागश्वङ्गसुदाहृतम् ।
नृपलक्ष्म भवेत्तत्तु यच्छत्त्रं पृथिवीभुजाम् ॥”
तस्य गुणाः । वृष्ट्यातपधूलिवायुहिमनाशित्वम् । वर्णहृत्कारित्वम् । शुभ्रावरणमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्पत्तिर्यथा । एकदा ज्यैष्ठमासे जमदग्निमुनिर्धनुषि बाणान् सन्धाय सन्धाय प्रचिक्षेप तत्पत्नी रेणुका तान् बाणानानीयानीय तस्मै प्रादात् । सा मध्याह्नकाले रौद्रेण पीड़िता वृक्षच्छायामवलम्ब्य किञ्चित् कालं स्थित्वा बाणानिनाय । ऋषिस्तदा क्रुद्धस्तामाह किं चिरेणागता । सा आह सूर्य्यतेजसा मे शिरः पादौ च सन्तप्तौ तेन वृक्षच्छायामाश्रित्य स्थिता तस्मात् चिरायेतत् कृतम् । तच्छ्रुत्वा मुनिराह अद्य सूर्य्यमस्त्राग्नितेजसा निपातयिष्यामीत्युक्त्वा धनुषि बाणान् सन्धाय सूर्य्याभिमुखोऽतिष्ठत् । सूर्य्यस्तं दृष्ट्वा भीतो द्विजरूपेण आगत्य आह सूर्य्यादस्मादि भवति तेनान्नेन भवद्भिः कर्म्माणि क्रियन्ते कथमेनं हनिष्यसि एवं माकार्षीस्तथापि मुनिः शमं न जगाम । अथ सूर्य्यः शिरस्त्राणं छत्त्रं निर्म्माय तस्मै दत्त्वा अद्यप्रभृति एतत् लोके प्रचरिष्यति व्रतादिषु च अस्य दानं महाफलं स्यादित्युक्त्वा गतः ॥ * ॥ तस्य दानफलं यथा,—
“छत्त्रं हि भरतश्रेष्ठ ! यः प्रदद्यात् द्विजातये ।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमेधते ॥
स शक्रलोके वसति पूज्यमानो द्विजातिभिः ।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ! ॥”

इति महाभारते दानधर्म्मः ॥

अथ छत्त्रयुक्तिः ।
“विशेषश्चाथ सामान्यं छत्त्रस्य द्विविधा भिदा ।
राज्ञश्छत्त्रं विशेषाख्यं सामान्यञ्चान्यदुच्यते ॥
तत्र विशेषच्छत्त्रोद्देशः ।
सदण्डञ्चाथ निर्द्दण्डं तज्ज्ञेयं द्विविधं पुनः ।
सदण्डं तत्र विज्ञेयं सारणाकुञ्चनात्मकम् ॥
दण्डः कन्दः शलाकाश्च रज्ज्वश्चैव कीलकः ।
षड्भिरेतैः सुसन्दिष्टैश्छत्त्रमित्यभिधीयते ॥
दिगष्टषट्चतुर्हस्तदीर्घो दण्डो युगक्रमात् ।
षड्बाणवेदनयनवितस्त्या कन्द उच्यते ॥
शतान्यशीतिः षष्टिश्च चत्वारिंशद्युगक्रमात् ।
शलाकाः षट्पञ्चवेदत्रिहस्तैः सम्मिताः क्रमात् ॥
नवभिस्तन्तुभिः सूत्रं सूत्रैस्तु नवभिर्गुणः ।
गुणैस्तु नवभिः पाशो रश्मिस्तैर्नवभिर्भवेत् ॥
नवाष्टसप्तषट्संख्यैरश्मिभी रज्ज्वः क्रमात् ।
वस्त्रं शलाकाद्विगुणमायामेन प्रतिष्ठितम् ॥
भानुदिग्ग्रहवसुभिरङ्गुलीभिस्तु कीलकः ।
यस्मा यस्मानसुदितं तद्राज्ञामेव भूतये ॥
पादोनं युवराजस्य अन्येषान्तु तदर्द्धतः ॥
एतेन राज्ञो दण्डो दशहस्तः युवराजस्य तत् अन्येषामपि तदेव ।

विशुद्धकाष्ठस्य तु दण्डकन्दौ
तथा शलाका अपि शुद्धवंशजाः ।
रज्जुश्च रक्ता वसनञ्च रक्तं
छत्त्रप्रसादं नृपतेर्वदन्ति ॥
प्रसादमिति प्रसादार्हम् ।
नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु काञ्चनः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥
चान्द्रनौ दण्डकन्दौ चेत् मुक्ता रज्जुवाससी ।
छत्त्रं मनोहरं राज्ञां स्वर्णकुम्भोपशोभितम् ॥
शुक्लानि रज्जुवासांसि स्वर्णकुम्भस्तथोपरि ।
इदं कनकदण्डाख्यं छत्त्रं सर्व्वार्थसाधकम् ॥
दण्डकन्दशलाकाश्च शुद्धस्वर्णेन निर्म्मिताः ।
कीलकं स्वर्णघटितमशुक्ले रज्जुवाससी ॥
कुम्भादिरथ हंसादिश्चामरादिर्यथाक्रमम् ।
कुम्भादावथ हंसादौ नवरत्नानि रचयेत् ॥
द्वात्रिंशन्मौक्तिकी माला द्वात्रिंशत्तत्र दापयेत् ।
सर्व्वोपरि ब्रह्मजातिं विशुद्धं हीरकं न्यसेत् ॥
दण्डान्ते कुरुविन्दांश्च पद्मरागांश्च विन्यसेत् ।
स्वामिहस्तैकमानेन चामरः सित इष्यते ॥
इत्ययं नवदण्डाख्यश्छत्त्रराजो महीभुजाम् ।
अभिषेके विवाहे च ग्रहाणां प्रीतिवर्द्धनः ॥
पताका नवदण्डाग्रे राज्ञोऽष्टाङ्गुलिसम्मिताः ।
अयं दिग्विजयी नाम छत्त्रराजो महीभुजाम् ॥”

इति भोजराजकृतयुक्तिकल्पतरुः ॥

छत्त्रः, पुं, (छद + णिच् + ष्ट्रन् ह्रस्वश्च ।) मूलेन पत्रेण च छत्त्राकारत्वात् । छातारियाविष । छातनाविष । खरविष इति च भाषा । तत्पर्य्यायः । अतिच्छत्त्रः २ कटुः ३ । इति रत्नमाला ॥ भूतृणम् । इति राजनिर्घण्टः ॥

छत्त्रकः, पुं, (छत्त्रमिव कायति इति । कै + कः ।) मत्स्यरङ्गपक्षी । इति शब्दचन्द्रिका ॥ अतिच्छत्त्रः । राङ्गा कुत्तेखाड़ा इति भाषा ॥ इति रत्नमाला ॥ ईश्वरगृहविशेषः । इति शब्दरत्नावली ॥

छत्त्रगुच्छः, पुं, (छत्त्रमिव गुच्छो यस्य ।) गुच्छतृणम् । इति राजनिर्घण्टः ॥

छत्त्रचक्रं, क्ली, (छत्त्राकृति चक्रम् ।) चक्रविशेषः । यथा, समयामृते छत्त्रचक्रम् ।
“अश्विनीमघमूलाद्यं चक्रं छत्त्रत्रयात्मकम् ।
प्रतीचीमध्यरेखाया ईशानान्तं हयाधिपः ॥
आग्नेयान्तं नराधीशो नैरृतान्तं गजाधिपः ।
एषां छत्त्रविभागेन ज्ञातव्यञ्च शुभाशुभम् ॥
अन्यस्य राज्ञो नामर्क्षं यत्र छत्त्रे ततः फलम् ।
चामरं कलसं वीणा छत्त्रं दण्डः पतद्ग्रहः ॥
आसनं कीलकं रज्जुर्नव भेदाः प्रकीर्त्तिताः ।
यत्र छत्त्रे स्थितः सौरिर्भङ्गं तस्य विनिर्द्दिशेत् ॥
चामरे चञ्चला वायोरनावृष्टिः प्रजायते ।
दुर्भिक्षञ्च भवेत् घोरं प्रजापीड़ा न संशयः ॥
कलसस्थे भवेद्युद्धं भङ्गो घातादिकं ध्रुवम् ।
वीणास्थेनार्कपुत्त्रेण पट्टराज्ञी विनश्यति ॥
चलचित्तो भवेद्राजा भयभीता च मेदिनी ।
यदा कच्चये सौरिश्छत्त्रे दण्डे पतद्ग्रहे ॥

तदा तस्य भवेद्भङ्गश्छत्त्रस्यास्य न संशयः ।
आसनस्थे भवेन्नाश आसनस्थे शनैश्चरे ॥
युवराजक्षयः कीले बन्धनं रज्जुसंस्थिते ।
सौम्ययुक्तोऽतिचारस्थः शनिरुक्तफलो न हि ॥
वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति सः ।
शनिराहुकुजादित्या यदा जीवेन्दुसंयुताः ॥
उत्तराधीशराज्ञो वै निश्चितं छत्त्रभङ्गदाः ।
क्रूरं चतुष्टयञ्चैव बुधचन्द्रेण संयुतम् ॥
पूर्व्वच्छत्त्रविनाशाय तथा पापचतुष्टयम् ।
शुक्रेन्दुसंयुतं छत्त्रे दक्षिणे शस्त्रभङ्गदम् ॥
एवमन्येषु राज्येषु नामर्क्षात् फलमादिशेत् ।
यथा दुष्टफलः सौरिस्तथा सौम्यफलो गुरुः ॥
भौमज्ञौ गुरुराहू च रविचन्द्रौ बले समौ ।
यथा हानिकराः क्रूरास्तथा सौम्याः शुभङ्कराः ॥
एतेऽचारौ ग्रहाश्छत्त्रे परचक्रेण भङ्गदाः ।
नृपनामर्क्षगो राहुः केतुर्व्वा यत्र संस्थितः ॥
छत्त्रभङ्गो भवेत्तस्य विषदानेन भूपतेः ।
म्रगयासाहसं यात्रां दुष्टहस्त्यश्ववाहनम् ॥
विग्रहञ्च त्यजेद्राजा छत्त्रस्थे क्रूरखेचरे ।
शान्त्यैव शान्तिकं कुर्य्यात् ग्रहाणां जायते शुभम् ॥”

छत्त्रधारः, त्रि, (छत्त्रं धरतीति । धृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) छत्त्रधरः । छातिधरा इति भाषा ॥ तत्पर्य्यायः । छायाकरः २ । इति हेमचन्द्रः । ३ । ४२८ ॥ (यथा, पञ्चतन्त्रे । ३ । ६७ । “स्वपक्षे च यथा, जननी देवी कञ्चुकी मालिकः शय्यापालकः स्पशाध्यक्षः सांवत्सरिकः भिषक् जलवाहकः ताम्बूलवाहकः आचार्य्यः अङ्गरक्षकः स्थानचिन्तकः छत्त्रधारः विलासिनी च ॥”)

छत्त्रपत्रं, क्ली, (छत्त्रमिव पत्त्रमस्य ।) स्थलपद्मम् । इति त्रिकाण्डशेषः ॥

छत्त्रपत्रः, पुं, (छत्त्रमिव विस्तृतं पत्त्रमस्य ।) भूर्जवृक्षः । इति रत्नमाला । (भूर्जशब्दे विवृतिरस्य ज्ञातव्या ॥) मानकचुः । इति केचित् ॥ सप्तपर्णवृक्षः । इति च केचित् ॥

छत्त्रभङ्गः, पुं, (छत्त्रस्येव रक्षितुः स्वामिन इत्यर्थः भङ्गो यत्र ।) वैधव्यम् । स्वातन्त्र्यम् । नृपनाशः । इति मेदिनी । गे, ५६ ॥

छत्त्रा, स्त्री, (छत्त्रमिव आकृतिर्विद्यतेऽस्याः । अर्श आदित्वादच् ततष्टाप् । यद्वा, छदति आच्छादयति स्रोतःप्रतिस्थानमिति । छद + “सर्व्वधातुभ्यः ष्ट्रन् ।” उणां । ४ । १५८ । इति ष्ट्रन् । ततः षित्त्वात् ङीषोऽनित्यत्वात् टाप् ।) मिषिः । मौरी इति भाषा ॥ कुस्तुम्बुरु । धन्या इति भाषा ॥ (यथा,—
“सुस्तपर्पटकोदीच्यछत्त्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥
छत्त्रा धान्याकम् ॥” इति भावप्रकाशः ॥)
शिलीन्ध्रम् । इति मेदिनी । रे, २८ ॥ कोँड़कछाता इति भाषा ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (निहत्तसत्त्वापात्तर्गतरसायनौषधिविशेषः । तस्य